| नामांक | | | Roll No. | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 15

No. of Printed Pages — 3

**VU—32–1—Vyak. Shas. I**

# वरिष्ठ उपाध्याय परीक्षा, 2011

## व्याकरणशास्त्रम्

## प्रथमपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) "चतुरनडुहोरामुदात्तः" इति सूत्रेण आम् भवति —

   (अ) भसंज्ञके (ब) सर्वनामस्थाने

   (स) अभ्यस्तसंज्ञके (द) षट्संज्ञके । 1

   (ii) "चतसृणाम्" इत्यत्र नुडागमः ................ इति सूत्रेण भवति ।

   (अ) ह्रस्वनद्यापोनुट् (ब) षट् चतुर्भ्यश्च

   (स) ष्णान्ता षट् (द) न तिसृचतसृ । 1

   (iii) 'स्त्रग्वि' इत्यत्र लिङ्गमस्ति —

   (अ) स्त्रीलिङ्गम् (ब) पुल्लिङ्गम्

   (स) नपुंसकलिङ्गम् (द) अव्ययपदम् । 1

   (iv) 'स्वरादिनिपातमव्ययम्' इत्यस्योदाहरणमस्ति —

   (अ) प्रातर् (ब) जीवसे

   (स) स्मारं स्मारम् (द) अतः । 1

2. 'योऽचि' इति सूत्रस्यार्थोदाहरणं लिखत । 1 + 1 = 2

3. 'युष्मत्' इत्यत्र अदादेशः केन सूत्रेण भवति ? 1

4. 'षष् + जस्' अत्र विभक्तिलोपः केन सूत्रेण भवति ? 1

5. **द्वयोः** सूत्रयोः सोदाहरणं व्याख्या कार्या — 2 + 2 = 4

   (i) अपोभि

   (ii) यः सौ ।

6. **द्वयोः** सूत्रयोः सोदाहरणं व्याख्या कार्या — 2 + 2 = 4

   (i) वा नपुंसकस्य

   (ii) आच्छीनद्योर्नुम् ।

7. प्रतिषेधसंनियोगशिष्टमुत्वं तदभावे न प्रवर्तते ।

अस्याः पङ्क्तेराशयं सोदाहरणं स्पष्टयत । 2

8. व्यदादिषु — इति दृशेः क्विन्विधानादन्यत्रापिकुत्वम् ? इति सोदाहरणं विवेच्यताम् । 2

9. नित्यात्परादपि नुभः प्राक् ''अप्तृन् ..................'' इति दीर्घः प्रतिपदोक्तत्वात् । नुम् । स्वाम्पि । निरवकाशत्वं प्रतिपदोक्तत्वम् इति पक्षे तु प्रकृते तद्विरहान्नुमेव । स्वम्पि ।

इत सम्यक् विवेचनीयम् । 4

**अथवा**

वष्टि भागुरिर ल्लोपमवाप्योरूपसर्गयोः ।

आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

अस्याः कारिकायाः सोदाहरणं व्याख्या कार्या ।

10. ध्रुक्षु, अनड्वान् , सुधुभ्याम् , चतुर्षु, इयम्

एषु त्रयाणां प्रयोगाणां सिद्धिर्विधेया । 2 + 2 + 2 = 6

11. अनेन, सुगण्सु, वृत्रघ्नः, पूष्णि, पन्थाः

एषु त्रयः प्रयोगाः साधनीयाः । 2 + 2 + 2 = 6

12. अष्टौ, युष्मान् , सुपदः — एषु द्वयोः सिद्धिर्विधेया । $2\frac{1}{2} + 2\frac{1}{2} = 5$

13. चतसृणाम् , आसाम्, त्विड्भ्याम् , अमू , सजूःषु, अमूषु — एषु चत्वारः प्रयोगाः साधनीयाः ।

2 + 2 + 2 + 2 = 8

14. स्वनडुत् , विमलदिवी, दण्डीनि, ददन्ति, पयांसि, शकानि — एषु चत्वारः प्रयोगाः कार्याः ।

2 + 2 + 2 + 2 = 8

15. कृत्वा, स्मारं स्मारम् , पशु — एषु द्वयोः सिद्धिर्विधेया । $1\frac{1}{2} + 1\frac{1}{2} = 3$